# shrIbAhuleyastavaH by shrInIlakaNThatIrthasvAmi

# શ્રીનીલકણ્ઠતીર્થસ્વામિવિરચિતઃ શ્રીબાહુલેયસ્તવઃ

## Document Information

Text title : Bahuleya Stavah by Nilakanthatirtha Swami

File name : bAhuleyastavaHnIlakaNThatIrthasvAmi.itx

Category : subrahmanya

Location : doc_subrahmanya

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : May 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીનીલકણ્ઠતીર્થસ્વામિવિરચિતઃ શ્રીબાહુલેયસ્તવઃ

ઐશ્વર્યમપ્રતિમમત્રભવાન્કુમારઃ
    સર્વત્ર ચાવહતુ નઃ કરુણાપણઃ સઃ ।
યેનાત્મવલ્લષિતભાગ્યપરાર્ધ્યભૂમિઃ
    સ્વારાજ્યસમ્પદપિ શશ્વદહો સનાથા ॥ ૧॥

શ્રીસ્કન્દકલ્પવિટપી કુરુતાત્સ બાહ્ય-
    માભ્યન્તરં ચ વિભવં યુગપત્સદા નઃ ।
દૃગ્વ્યાપૃતિપ્રતિમિતિં ભ્રમરાવલીં યો
    નિત્યં બિભર્તિ કરુણામકરન્દપુષ્ટામ્ ॥ ૨॥

ભદ્રં કૃષીષ્ટ નિતરામિહ સૈદ્ધસેની(૧)
    સાનુગ્રહપ્રકૃતિનેત્રપરમ્પરા નઃ ।
મોહાન્ધકૂપપતિતેઽવ્યભિચારતો દ્રાગ્
    યા દોરકી(૨) ભવતિ તત્પદબદ્ધચિત્તે ॥ ૩॥

વિદ્યા ચતુર્દશતયી શરજન્મનામ્નિ
    યસ્મિન્નુ પર્યવસિતાઽવ્યવધાનતો નઃ ।
પુષ્ણાતુ સૈષ સકલાસુ કલાસુ દાક્ષ્યં
    ચિન્તામણિપ્રતિભટી ભવદઙ્ઘ્રિરેણુઃ ॥ ૪॥

ષાણ્માતુરસ્મિતવલચ્છરદાગમો મે
    પ્રજ્ઞાસરોવરમલં વિમલં દધાતુ ।
યેનાત્ર સચ્ચિતિયુસુખૈકરસાત્મચન્દ્રં
    સાક્ષાત્કરોત્વનિદમાત્મતયાઽયમેવ ॥ ૫॥

દધ્યુઃ શ્રિયસ્ત્રિભુવનાદ્ભુતબસ્તુવાર્દ્ધિ-
    મન્થાદ્રિવિભ્રમપટૂનિ ગુહેક્ષણાનિ ।
સ્તન્યાવસાનસમયે નિજમાતૃવક્ત્ર-
    પદ્મે ભ્રમદ્ભ્રમરિકાલઘુમન્થરાણિ ॥ ૬॥

નૈસર્ગિકી યદાપિ ભિન્નપુમાશ્રયાત્વં
    વાચઃ શ્રિયસ્તદપિ યત્કરુણાકટાક્ષઃ ।
સૂતેઽન્વહં નિજજનેષુ રવિપ્રભેવ
    શ્લિષ્ટે નુમઃ પરમકારુણિકં ગુહં તમ્ ॥ ૭॥

પ્રત્યક્ત્તયા શ્રુતિપુરાણવચોનિગુમ્ફ-
    સ્તાત્પર્યવાન્ભવતિ વર્ણયિતું યમર્થમ્ ।
શ્રેયાંસિ નૈકવિધયા પ્રકટં વિદધ્યા-
    ત્સૈષોઽગ્નિભૂરિહ પરાર્થસમુદ્યમેષુ ॥ ૮॥

નૈયત્યતો હૃદિ પદં સ તનોતુ બાલ(૩)-
    ચર્યઃ સ્તિથિં ય ઇહ સાક્ષિતયાપિ ધત્તે ।
એવં ચ બુદ્ધ્યરણિતત્પદચિત્રગૂત્થા(૪)
    સંવિત્તિદીપકલિકાખિલદીપિકા સ્યાત્ ॥ ૯॥

યમિન્મનાગપિ મનઃ પ્રણિધાય કાય-
    વ્યૂહાદિસર્વવિભવં પ્રતિપદ્યતે ના ।
યોગેશ્વરેશ્વરમિતઃ કૃકવા(૫)કુકેતું
    ભત્ત્યા વ્રજામિ શરણં કરણૈસ્ત્રિભિસ્તમ્ ॥ ૧૦॥

શબ્દા(૬)નુશાસનનયપતિનોઽત્ર વર્ણ
    વ્યઙ્ગ્યસ્તતો ભવતિ યોઽર્થ ઇવાતિરિક્તઃ ।
સ્ફોટઃ સ એષ ઇતિ યં કથયન્તિ નિત્યં
    કુર્મસ્તમેય ઇદિ ષણ્મુખનામધેયમ્ ॥ ૧૧॥

માર્ગાન્તરોક્ત(૭)વિધયા પરમાણુવર્ગે-
    ષ્વાદ્યં સમુન્મિષતિ જન્તુકૃતેન કર્મ ।
યસ્યાત્મસંવિદુદયસ્ય વિભોઃ સિસૃક્ષા-
    વેલાસુ નૌમિ પરકારુણિકં ગુહં તમ્ ॥ ૧૨॥

યદ્યયન્ન પૂરયતિ તે ચરણાનુષઙ્ગ-
    સ્તત્તદ્ધ્યનુદ્ભવપરાહતમેવ વિદ્મઃ ।
વસ્ત્વીપ્સિતં ક્વચિદપીશતનૂજ તસ્મા-
    ન્નેત્રામૃતપ્રભ દૃશોર્વિષયસ્ત્વમેધિ ॥ ૧૩॥

વાચસ્પતિપ્રમુખવાગપિ યત્ર કુણ્ઠી-

ભાવં પ્રયાતિ તમિતિ પ્રણુવન્ન લજ્જે ।
ત્વદ્ભક્તિભારમુખરીકરણાન્મૃષિત્વા
સ્વામિન્વિધેહિ તદપીહ કૃપાર્દ્રદૃષ્ટિમ્ ॥ ૧૪॥

કાલત્રયેઽપિ કરણત્રયસમ્પદે નઃ
સર્વોત્તમત્વત ઇહાભિમતં તવાપિ ।
યદ્યદ્ધિ તત્તદખિલં કરુણામ્બુવારિ-
વાહાશુ મે વિતર હે ભગવન્નમસ્તે ॥ ૧૫॥

શ્રીબાહુલેયસ્તવમુત્તમં યઃ
પઠેત્પ્રભાતે પ્રયતઃ સ ધીમાન્ ।
વાગર્થવિજ્ઞાનધનાઢ્યતામે-
ત્યન્તે વિશોકં પદમભ્યુપેયાત્ ॥ ૧૬॥

અર્ભાહ્વસ્વામિપાદાબ્જમરન્દરસશીલિનઃ ।
શ્રીનીલકણ્ઠતીર્થાખ્યસ્યેદં સ્વામિ(૮)સમર્પણમ્ ॥ ૧૭॥

નમો ગુહાય । ૐ ॥

ઇતિ શ્રીનીલકણ્ઠતીર્થસ્વામિવિરચિતઃ શ્રીમદ્બાહુલેયસ્તવઃ સમ્પૂર્ણઃ ॥

Footnotes

Verse 3 (૧) સિદ્ધસેનસ્ય=સ્કન્દસ્ય-ઇયમ્ ।
(૨) સમુદ્ધરણોપયોગિ રજ્જુરિતિ ભાવઃ ॥
Verse 9 (૩) બાલચર્યઃ સિદ્ધસેન ઇતિ ત્રિ. શે. ।
(૪) ચિત્રગુરુરુત્તરારણિઃ । જ્ઞાનં કૃત્વા તુ ચિત્રગું દ. મુ. ઉપ. ।
Verse 10 (૫) માયણ સઃ પુ. દે. । કેશિત કામમાયા ॥
Verse 11 (૬) વૈયાકરણાઃ ।
Verse 12 (૭) વૈશેષિકોતગતઃ ।
Verse 17 (૮) ઇમારતુ સામી દ્વાદશલોચનઃ ત્રિ.શે.

Proofread by PSA Easwaran

*shrIbAhuleyastavaH by shrInIlakaNThatIrthasvAmi*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*